शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत् ॥"
इति प्रायश्चित्ततत्त्वे मनुः ॥
अन्यच्च ।
"एकपादमथैकस्मिन् विन्यसेदुरु संस्थितम् ।
इतरस्मिन् तथा पश्चाद्वीरासनमिदं विदुः ॥"
इति घेरण्डसंहिता ॥
( यथा, रघुवंशे । १३ । ५२ ।
"वीरासनैर्ध्यानजुषामृषीणा-
ममी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति
योगाधिरूढा इव शाखिनोऽपि ॥")
वीरिणी, स्त्री, असिक्नी । यथा,—
"उपयेमे वीरणस्य तनयां दक्ष ईप्सिताम् ।
वीरिणी नाम तस्यास्तु असिक्नीत्यपि सत्तमाः ॥"
इति कालिकापुराणे ८ अध्यायः ॥
( यथा च महाभारते । १ । ७५ । ५ ।
"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः ।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान् ॥"
वीरः पुत्त्रोऽस्या अस्तीति । वीर + इनि । ङीप् ।
पुत्त्रवती । यथा, ऋग्वेदे । १० । ८६ । ९ ।
"उताहमस्मि वीरिणीन्द्रपत्नी ॥"
"वीरिणी पुत्त्रवती ।" इति तद्भाष्ये सायणः ॥)
वीरुत्, [ध्] स्त्री, (विशेषेण रुणद्धि वृक्षानन्यान् ।
वि + रुध + क्विप् । "अन्येषामपीति ।" दीर्घः ।
अथवा विरोहतीति वीरुत् । विपूर्व्वस्य रुहेः
क्विपि धकारो विधीयते इति काशिका ।७।३।
५३ ।) विस्तृता लता । तत्पर्य्यायः । गुल्मिनी २
उलपः ३ । इत्यमरः ॥ वीरुधा ४ । इति शब्द-
रत्नावली ॥ प्रतानः ५ कक्षः ६ । इति जटा-
धरः ॥ ( यथा, रघुवंशे । ८ । ३६ ।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम् ॥"
ओषधिः । यथा, ऋग्वेदे । २ । ६७ । ५ ।
"वियो वीरुत्सु रोधन्महित्वोत प्रजा उतप्रसू-
ष्वन्तः ॥"
"वीरुत्सु ओषधीषु ।" इति तद्भाष्ये सायणः ॥
वृक्षमात्रे, पुं । यथा, महाभारते ।१।४५।२४।
"यानि पश्यसि वै ब्रह्मन् ललाटेनास्य वीरुधः ।
एते नस्तन्तवस्तात कालेन परिभक्षिताः ॥"
यथा च ऋग्वेदे । ९ । ११३ । २ ।
"सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिः ॥"
"वीरुधां वनस्पतीनामिति ।" इति तद्भाष्ये
सायणः ॥ लतानां वीरुधाञ्च कथञ्चिद्भेदमाह ।
यथा, भागवते । ३ । १० १९ ।
"वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः ।"
"ये पुष्पं विना फलन्ति ते वनस्पतयः । ओषधयः
फलपाकान्ताः । लता आरोहणापेक्षाः । त्वक्-
सारा वेण्वादयः । लता एव काठिन्येनारोहणा-
नपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते द्रुमाः ।"
इति तट्टीकायां श्रीधरस्वामी ॥ )
वीरुधा, स्त्री, ( विशेषेण रुणद्धीति । वि + रुध +
इगुपधादिति कः । ततस्त्रियां टाप् । अथवा
वीरुध् शब्दात् भागुरिमते टाप् । यथा,—
"वष्टि भागुरिरल्लोपः अवाप्योरुपसर्गयोः ।
टापञ्चापि हलन्तानां क्षुधा वाचा निशा
गिरा ॥")
वीरुत् । इति शब्दरत्नावली ॥
वीरेशः, पुं, ( वीराणामीशः । ) शिवः । यथा,—
"अथ त्रयोदशे मासि स्नात्वा त्रिपथगाम्भसि ।
प्रत्यूष एव वीरेशं यावद्यायाति स द्विजः ॥"
इति वीरेश्वरस्तोत्रम् ॥
वीरेश्वरः, पुं, ( वीराणामीश्वरः । ) महादेवः ।
यथा,—
"तिलान्तरेऽपि नो काश्यां भूमिर्लिङ्गं विना
क्वचित् ।
परं वीरेशसदृशं न लिङ्गन्त्वाशु सिद्धिदम् ॥
धर्म्मदञ्चार्थदं सम्यक् कामदं मोक्षदं तथा ।
यथा वीरेश्वरं लिङ्गं काश्यां नान्यत्तथा ध्रुवम् ॥"
इति काशीखण्डे १० अध्यायः ॥
(मैथिलानां दशकर्म्मपद्धतिकर्त्ता । तत्पद्धतिश्च ॥)
वीरोज्झः, पुं, होमाकर्त्ता । यथा,—
"अभ्युदिताभिनिर्म्मुक्तौ वीरोज्झो न जुहोति
यः ॥"
इति हेमचन्द्रः ॥
वीरोपजीविकः, पुं, अग्निहोत्रमुपजीविका यस्य ।
यथा,—
"अग्निहोत्रफलाद्याचापरो वीरोपजीविकः ॥"
इति हेमचन्द्रः ॥
वीर्य्यं, क्ली, (वीरे साधु । तत्र साधुः इति यत् । यद्वा,
वीर्य्यतेऽनेनेति वीर विक्रान्तौ + "अचो यत् ।"
३।१।९७। इति यत् । यद्वा वीरस्य भावः । यत् ।)
चरमधातुः । तत्पर्य्यायः । शुक्रम् २ तेजः ३
रेतः ४ बीजम् ५ इन्द्रियम् ६ । इति मनुष्य-
वर्गे अमरः ॥ वीर्य्यं शक्तिः सा च पृथिव्यादीनां
यः सारभागः तदतिशयरूपा । सा द्विविधा
चिन्त्याचिन्त्यक्रियाहेतुत्वेन । तत्र चिन्त्यक्रिया-
हेतुर्या द्रव्यरसादीनां स्वस्वकर्म्मणि स्वभाव-
सिद्धा शक्तिः । अचिन्त्यक्रियाहेतुश्च प्रभावपर-
पर्य्यायः । द्रव्याणां रसाद्यननुरूपकार्य्यकरण-
शक्तिः । उक्तञ्च ।
"भूतप्रभावातिशयो द्रव्ये पाके रसे स्थितः ।
चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धन्वन्तरेर्म्मतम् ॥"
इति चक्रदत्तोपरि शिवदासीयटीका ॥ * ॥
परवीर्य्योदरपातदोषो यथा,—
"परवीर्य्यं यदुदरं कामतोऽकामतोऽपि वा ।
आहल्यैः याति दैवेन तदुपायं निशामय ॥
अकामतो न दुष्टा सा प्रायश्चित्तेन शुद्ध्यति ।
कामभोगेन त्याज्या सा कर्म्मभोगेन शुद्ध्यति ॥
पितृपाके दैवपाके पूजायां नाधिकारिणी ।
षष्टिं वर्षसहस्राणि चर्यं कृत्वा स्वकर्म्मणः ।
प्रयाति भोगदेहं सा तस्यान्ते पापकर्म्मणः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४७ अध्यायः ॥
अतिशयशक्तिभागुत्साहः । इति स्वर्गवर्गे
अमरः ॥ कर्म्मसु सुकरः प्रत्ययः उत्साहः ।
इति मधुः । कर्म्मसु दृढ़यत्नकारको भाव
उत्साहः । इति रमानाथः । कर्म्मसु प्रत्यय
उत्साह इति नयनानन्दः । अशक्ये बलोद्यम
उत्साह इति केचित् । स उत्साहः अतिशय-
शक्तिभाक् वीर्य्यम् । अतिशयितोऽध्यवसायो
वीर्य्यं साधु वीर्य्यमित्यर्थः । वीर्य्या स्त्री च वीर्य्यं
वीर्य्यं इति कोषान्तरम् । इति भरतः ॥ * ॥
बलम् । प्रभावः । इति नानार्थे अमरः ॥
( यथा, ऋग्वेदे । ३ । २५ । २ ।
"अग्निः सनोति वीर्य्याणि विद्वान्
सनोति वाजममृताय भूषन् ॥"
"वीर्य्याणि पशुपुत्त्रादिसम्पद्रूपाणि सामर्थ्यानि ।"
इति तद्भाष्ये सायणः ॥ यथा च भागवते । ६ ।
१७ । ३१ ।
"ज्ञानवैराग्यवीर्य्याणां नहि कश्चिद्व्यपाश्रयः ॥"
शरीरसामर्थ्यम् । यथा, ऋग्वेदे । ४ । ५० । ७ ।
"स इद्राजा प्रतिजन्यानि विश्वाशुष्मेण तस्था-
वभि वीर्य्येण ॥"
"वीर्य्येण शरीरसामर्थ्येन ।" इति तद्भाष्ये
सायणः ॥ शक्तिः । यथा, मनौ । ११ । ३१ ।
"न ब्राह्मणो वेदयते किञ्चिद्राजनि धर्म्मवित् ।
स्ववीर्य्येणैव तान् शिष्यान्मानवानपकारिणः ॥
स्ववीर्य्याद्राजवीर्य्याच्च स्ववीर्य्यं बलवत्तरम् ।
तस्मात् स्वेनैव वीर्य्येण निगृह्णीयादरीन् द्विजः ॥"
मनःशक्तिः । यथा, भागवते । ४ । १८ । १५ ।
"कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् ।
हिरण्मयेन पात्रेण वीर्य्यमोजो बलं पयः ॥")
औषधानां वीर्य्यस्य स्थितिकाला यथा,—
"यामं कल्ककषायवीर्य्यमखिलं चूर्णञ्च पक्षत्रयं
षण्मासान् घृतमोदकौ सहगुड़ौ मासत्रयं
गुग्गुलोः ।
सिद्धानां रसभस्मनां सुविपुलं वीर्य्यञ्च वर्षत्रयं
किञ्चिन्न्यूनविवर्जितं गुणपरं तैलं पुराणं महत् ॥"
इति नारायणदासकृतपरिभाषा ॥
तेजः । इति मेदिनी ॥ चेतः । दीप्तिः । इति
शब्दरत्नावली ॥
वीर्य्यजः, पुं, ( वीर्य्याज्जायते इति । जन + डः । )
पुत्त्रः । इति केचित् ॥ ( यथा, भागवते । ३ ।
५ । १९ ।
"नैतच्चित्रं त्वयि कार्त्स्न्याद्बादरायणवीर्य्यज ॥")
वीर्य्यवान्, [त्] त्रि, (वीर्य्यमस्यास्तीति । मतुप् ।)
मांसलः । इति शब्दरत्नावली ॥ वीर्य्ययुक्तश्च ॥
( यथा, किराते । २ । ४ ।
"अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥")
वीर्य्यवृद्धिकरं, क्ली, (वीर्य्याणां वृद्धिकरम् ।) शुक्र-
वृद्धिकारकौषधादि । तत्पर्य्यायः । वृष्यम् २
वाजीकरणम् ३ बीजकृत् ४ । इति राज-
निर्घण्टः ॥
वीर्य्या, स्त्री, ( वीर्य्यतेऽनयेति । वृ + "अचो यत् ।"
इति यत् । टाप् । ) वीर्य्यम् । इत्यमरटीकायां
भरतः ॥